# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| कक्षा- आचार्य-१ (SEM-1) | प्रश्नपत्र-४ | गुणा: - ७० |
|---|---|---|
| विषय:- वास्तुशास्त्रम् | CC413 | समय: - ०३ त: ०६ |
| दिनाङ्क: - ०८/१२/२०१६ | सन्दर्भग्रन्थ: - बृहद्वास्तुमाला | |

॥ प्रथमान्विति: ॥

**प्र-१ अधोनिर्दिष्टयो: एकस्य सान्वयं व्याख्यायत ।** ०४

१. द्वारशुद्धिं निरीक्ष्यादौ भशुद्धिं वृषचक्रत: ।
निष्पञ्चके स्थिरे लग्ने द्व्यङ्गे वालयमारभेत् ॥

२. ईशोच्चं निरृतौ नीचं भूतलं भूतवीथिकम् ।
आग्नेयोच्चं वायुनीचं नागवीथी प्रशस्यते ॥

**प्र-२ ग्रामवासे काकिणीविचार: सोदाहरणं वर्णयत ।** १२

**अथवा**

**शल्यशोधनपद्धति: ग्रन्थोक्तदिशा दर्शयत ।**

**प्र-३ अधोनिर्दिष्टेषु टिप्पणीद्वयं लिखत ।** ०४

१. गजपृष्ठभूमिलक्षणम् ।

२. गृहनिर्माणे शुभकाष्ठानि ।

३. परगृहनिवासफलम् ।

॥ द्वितीयान्विति: ॥

**प्र-४ निम्नदर्शितयो: एकस्य सान्वयं व्याख्यां कुरुत ।** ०४

१. प्रथमं सुसमे क्षेत्रे प्राचीं संसाधयेत् स्फुटम् ।
सिद्धान्तोक्तप्रकारेण ततो निष्पादयेद् गृहम् ॥

२. देवालये गेहविधौ जलाशये राहोर्मुखं शम्भुदिशो विलोमत: ।
मीनार्कसिंहार्कमृगार्कतस्त्रिभे खाते मुखात् पृष्ठविदिक्शुभाभवेत् ॥

**प्र-५ भास्करमते दिक्साधनविधि: ग्रन्थोक्तदिशा प्रदर्शयत ।** १२

**अथवा**

**गृहारम्भे मासनिर्णय: शुभाशुभफलसहितं वर्णयत ।**

**प्र-६ निम्नलिखितेषु टिप्पणीद्वयं लिखत ।** ०४

१. ताराया: शुभाशुभे फलम् ।

२. गृहारम्भे निषिद्धतिथय: ।

३. गृह-गृहस्वामीमेलापके नाडीविचार: ।

॥ तृतीयान्विति: ॥

**प्र-७ अधोलिखितानां एका कारिका सान्वयं व्याख्यायत ।** ०४

१. सूर्यभाद् गणयेद्वास्तुचक्रं च दिनभावधि ।
अश्व-रुद्र-दशर्क्षञ्च ह्यशुभं शुभदं क्रमात् ॥

२. वास्तोः शिरसि पुच्छे च याम्यकुक्षौ च पृष्ठतः ।

आयुः काममखेन्नेव वामकुक्षौ खनिः शुभा ॥

**प्र-८ गृहारम्भे वृषवास्तुचक्रं सविस्तरं प्रतिपादयत ।** **०८**

**अथवा**

**वामरविविचारः ग्रन्थाधारेण विस्तारपूर्वकं दर्शयत ।**

**प्र-९ अधोनिर्दिष्टेषु केषाञ्चित् त्रयाणामुत्तरं लिखत ।** **०३**

१. मार्गवेधयुक्तगृहस्य किं फलम् ?

२. सुग्रीवस्य स्थाने द्वारस्थापने किं फलम् ?

३. ज्येष्ठानक्षत्रे द्वारस्थापने किं फलम् ?

४. व्याख्यां कुरुत - अपूर्वसंज्ञकगृहप्रवेशः ।

५. गृहप्रवेशने मेषलग्ने फलं किम् ?

**॥ चतुर्थान्वितिः ॥**

**प्र-१० अधोलिखितयोः एकस्य व्याख्यां कुरुत ।** **०४**

१. ईशाने रोपयेद्धात्रीं नैरृत्ये चिञ्चिणीद्रुमान् ।

आग्नेयां दाडिमं चैव वायव्ये विल्ववृक्षकम् ॥

२. यो वाटिका राजपथः समीपे स्विष्टां तथा कूपसमन्विताञ्च ।

स्वर्गे च वासं लभते मनुष्यश्चतुर्युगं सर्वसुखैरुपेतः ॥

**प्र-११ वाटिकानिर्माणविधानं ग्रन्थाधारेण स्पष्टयत ।** **०८**

**अथवा**

**ग्राह्याग्राह्यवृक्षविचारः ग्रन्थाधारेण प्रदर्शयत ।**

**प्र-१२ त्रयाणामतिलघूत्तराणि देयानि ।** **०३**

१. उत्तरदक्षिणअश्वबन्धने किं फलम् ?

२. गृहे सदुग्धवृक्षस्य फलं किम् ?

३. हस्तनक्षत्रे वृक्षारोपणे किं फलम् ?

४. बदर्यावृक्षतः जलशिराज्ञानं कथं क्रियते ?

५. सिंहद्वारस्य कस्यां दिशायां गजशालायाः निर्माणं करणीयम् ?